वण्टकः, पुं, (वण्ट एव । स्वार्थे कन् ।) भागः । इत्यमरः । ३।३।८६ ॥ (वण्ट + ण्वुल् । विभागकर्त्तरि, त्रि ॥)

वण्ठः, पुं, (वण्ठते इति । वठि ङ एकचरे + अच् ।) अकृतोद्वाहः । खर्व्वः । कुन्तायुधः । इति मेदिनी । ठे, ८ ॥

वण्डरः, पुं, स्थगिकारज्जुः । कुक्कुरस्य लाङ्गूलम् । करीरकोषः । तालस्य पल्लवम् । पयोधरः । इति मेदिनी । रे,१८८॥ तत्र ओष्ठ्यवकारादौ गणितोऽयम् । किन्तु वठि ङ एकचरे इत्यस्मात् अरच्प्रत्ययेन निष्पन्नत्वात् दन्त्यवकारादौ लिखितः ॥

वण्डालः, पुं, शूरयुद्धम् । नौका । खनित्रम् । इति मेदिनी हेमचन्द्रश्च ॥

ब(व)ण्डः, पुं, (वनते इति वनु सम्भक्तौ । वन् + "अमन्तात् डः ।" उणा० १ । ११३ । इति डः ।) अनावृतमेढ्रः । तत्पर्य्यायः । दुश्चर्म्मा २ शिपिविष्टः ३ शिपिविष्टः ४ । इति हेमचन्द्रः ॥

वण्डः, त्रि, (वनते इति । वन सम्भक्तौ । वन् + "अमन्तात् डः ।" उणा० १।११३ । इति डः ।) हस्तादिवर्ज्जितः । इति मेदिनी । डे, २४ ॥ वेँड़े इति भाषा ॥

वण्डा, स्त्री, (वण्ड + टाप् ।) पांशुला । इति मेदिनी । डे, २४ ॥

वत, अ, (वातीति । वा + डति ।) साम्यम् । तत्पर्य्यायः । वा २ यथा ३ तथा ४ एव ५ एवम् ६ । इत्यमरः ॥

वत, अ, खेदः । अनुकम्पा । (यथा, शकुन्तलायाम् । प्रथमाङ्के ।
"क्व वत हरिणकानां जीवितञ्चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥")
सन्तोषः । विस्मयः । आमन्त्रणम् । इत्यमरः । ३ । ३ । २४३ ॥

वतंसः, पुं, (अवतंसयति अवतंस्यतेऽनेन वेति । अव + तसि + अच् । घञ् वा । अवस्याल्लोपः ।) कर्णपूरः । कर्णभूषणम् । शेखरः । शिरोभूषणम् । इति मेदिनी । से, ३७ ॥ (यथा, गीतगोविन्दे । २ । २ ।
"चलितदृगञ्चलचञ्चलमौलिकपोलविलोल-
वतंसम् ।
रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥")

वतण्डः, पुं, (वनतीति । वन् + "अण्डन् कृसृभृवृञः ।" उणा० १ । १२८ । इत्यत्र वनतेस्तकारान्तादेशः । वतण्ड इति काचिद्वृत्तिरित्युज्ज्वलदत्तोक्त्या अण्डन् प्रत्ययेन साधुः ।) मुनिभेदः । इत्युणादिकोषः ॥

वतूः, पुं, देवनदी । सत्यवाक् । पन्थाः । अक्षिरोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥

वतोका, स्त्री, (अवगतं तोकं अपत्यं यस्याः अवस्याल्लोपः ।) अवतोका । इत्यमरटीकायां भरतः ॥

वत्सं, क्ली, (वदतीति । वद् व्यक्तायां वाचि + "वृतॄवदिहनिकमिकषिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वक्षः । इत्यमरः ॥

वत्सः, पुं, (वदतीति । वद् + "वृतॄवदिहनिकमिकषिभ्यः सः ।" उणा० ३ । ६२ । इति सः ।) वर्षः । गोशिशुः । बाछुर इति भाषा । तत्पर्य्यायः । शकृत्करिः २ तर्णकः ३ । इति वैश्यवर्गे नानार्थे चामरः ॥ दोग्धा ४ दोषकः ५ दोषः ६ । इति शब्दरत्नावली ॥ रौहिणेयः ७ बाहुलेयः ८ तन्तुभः ९ । सद्योजातस्य तस्य पर्य्यायः । तर्णकः १ तर्णभः २ तन्तुभः ३ कचः ४ । इति जटाधरः ॥ पुत्त्रादिः । इति मेदिनी । से, ११ ॥ बाछा इति भाषा । (यथा, भागवते । ४ । ८ । ११ ।
"न वत्स ! नृपतेर्धिष्ण्यं भवानारोढुमर्हति ।
न गृहीतो मया यत् त्वं कुक्षावपि नृपात्मज ! ॥"
दिवोदासपुत्त्रः । द्युमानित्यादीन्यस्य नामान्तराणि । यथा, भागवते । ९ । १७ । ५—६ ।
"तत्पुत्त्रः केतुमानस्य जज्ञे भीमरथस्ततः ।
दिवोदासो द्युमांस्तस्मात् प्रतर्द्दन इति स्मृतः ॥
स एव शत्रुजिन् वत्स ऋतध्वज इतीरितः ।
तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥"
देशभेदः । यथा, कथासरित्सागरे । ९ । ४ ।
"अस्ति वत्स इति ख्यातो देशो दर्पोपशान्तये ।
स्वर्गस्य निर्म्मितो धात्रा प्रतिमल्ल इव क्षितौ ॥")

वत्सकं, क्ली, (वत्स + संज्ञायां इवार्थे वा कन् ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ (विवरणमस्य पुष्पकासीसशब्दे ज्ञातव्यम् ॥)

वत्सकः, पुं, (वत्स + कन् ।) कुटजः । इत्यमरः ॥ (अस्य पर्य्यायो यथा,—
"इन्द्रकः शक्रपर्य्यायो वत्सको गिरिमल्लिका ।
कुटजस्तत्फलञ्चेन्द्रयवश्चापि कलिङ्गकः ॥"
इति वैद्यकरत्नमालायाम् ॥
तथान्यः पर्य्यायः ।
"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।) इन्द्रयवः । इति राजनिर्घण्टः ॥

वत्सकबीजं, क्ली, (वत्सकस्य बीजम् ।) इन्द्रयवः । इति राजनिर्घण्टः ॥ (यथा,—
"योषं वत्सकबीजञ्च निम्बभूनिम्बमार्कवम् ।
चित्रकं रोहिणीं पाठां दार्व्वीमतिविषां
समाम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वरातिसारे योषाद्यचूर्णे ॥)

वत्सकामा, स्त्री, (वत्सं कामयते इति । कम् + अच् । टाप् ।) वत्साभिलाषिणी गौः । तत्पर्य्यायः । वत्सला २ । इति राजनिर्घण्टः ॥ पुत्त्रादिकामा स्त्री च ॥

वत्सतरः, पुं, (प्रथमवया वत्सः । "वत्सोक्षाश्वर्षभेभ्यश्चेति ।" ५।३।९१ । इति ष्टरच् ।) प्राप्तदमनकालगवः । दोयाने बाछुर इति भाषा । तत्पर्य्यायः । दम्यः २ । इत्यमरः । २ । ९ । ६२ ॥ दुर्दान्तः ३ गड्डिः ४ । इति राजनिर्घण्टः ॥

वत्सतरी, स्त्री, (वत्सतर + ङीप् ।) वृषोत्सर्गे वृषपत्नीत्वेन कल्पिता त्रिहायणी गौः । यथा, कात्यायनसूत्रम् । पयस्विन्याः पुत्त्रो यूथे च रूपवान् स्यात् तमलङ्कृत्य यूथमुख्याश्चतस्रो वत्सतर्य्यस्ताश्चालङ्कृत्य एनं युवानं पतिं वो ददामि तेन क्रीड़न्तीश्चरथ प्रियेण मनः साप्रजनुषा सुभगा रायस्पोषेण समिषा मदेम इत्येतयैवर्च्चोत्सृजेरन्निति । अत्रार्थस्तु हे वत्सतर्य्यो वो युष्माकं एनं युवानं पतिं स्वामिनं ददामीत्युक्तं प्रार्थयामि तेन वृषेण सह क्रीड़न्त्यः खेलन्त्यश्चरथ भ्रमथ हे वत्सतर्य्यो यूयमपि मानः नास्मत्सत्वविषया भविष्यथ किन्तु मया त्यक्तयाः । वयं वृषस्य वत्सतरीणाञ्च त्यागेन रायस्पोषेण धनसन्दृष्ट्या साप्रजनुषा सप्रजन्मव्यापकेन इषा अन्नेन च सम्मदेम हृष्टा भवामः सुभगा लोकस्य प्रिया इति सम्मदेम इति भविष्यत्सामीप्ये वर्त्तमान इति पाणिनिस्मरणाद्भविष्यदर्थे वर्त्तमानः ॥ * ॥ वत्सतरीर्व्विशेषयति स्मृतिः ।
"अग्रतो लोहिता पत्नी पार्श्वाभ्यां नीलपाण्डरे ।
पृष्ठतस्तु भवेत् कृष्णा वृषभस्य तु मोचने ॥"
तासां वयःप्रमाणं यथा,—
"त्रिहायणीभिर्धन्याभिः सुरूपाभिः सुशोभितः ।
सर्व्वोपकरणोपेतः सर्व्वशस्यचरो महान् ।
उत्सृष्टव्यो विधानेन श्रुतिस्मृतिनिदर्शनात् ॥"
इति शुद्धितत्त्वे वृषोत्सर्गविचारः ॥

वत्सनाभः पुं, (वत्सान् नभ्यति हिनस्तीति । नभ हिंसायाम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) विषवृक्षविशेषः । इत्यमरः १।८।११ ॥ स तु स्थावरविषभेदः । प्रायो वत्सान् नभ्यति हिनस्ति वत्सनाभः णभ ण हिंसे धातुं वदन्ति सन् । वत्सस्य नाभिरिव वत्सनाभः णः अनितस्येति न वृद्धिः अयं सिन्धुवारपत्रसदृशपत्रः । इति भरतः ॥ * ॥ (यथा, हरिवंशे । २२३ । ६५ ।
"वरणा वत्सनाभाश्च पनसाश्चन्दनैः सह ॥)
तत्पर्य्यायः । अमृतम् २ विषम् ३ उग्रम् ४ महौषधम् ५ गरलम् ६ मारणम् ७ नागः ८ स्तोककम् ९ प्राणहारकम् १० स्थावरादि ११ । अस्य गुणाः । अतिमधुरत्वम् । उष्णत्वम् । वातकफकण्ठरुक्सन्निपातनाशित्वम् । पित्तसन्तापकारकत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्य स्वरूपनिरूपणं यथा ।
"सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वेन तरोर्वृद्धिर्व्वत्सनाभः स भाषितः ॥"
तस्य सामान्यगुणा यथा ।
"विषं प्राणहरं प्रोक्तं व्यवायि च विकासि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥"
व्यवायि सकलकायव्यापनपूर्ब्बकपाकगमनशीलम् ।